नित्यनैमित्तिकीं क्रियाम्। अश्वं रथं हस्तिनं वा वाहयेद्वा नृपाज्ञया। सैनापत्यञ्च भैषज्यं कुर्य्याज्जीवेत्तु वृत्तिषु। नृपायां विप्रतश्चौर्य्यात् संजातो यो भिषक् स्मृतः। अभिषिक्तनृपस्याज्ञां परिपाल्ये स वैद्यकम्। आयुर्वेदमथाष्टाङ्गं तन्त्रोक्तं धर्म्ममाचरेत्। ज्योतिषं गणितं वापि कायिकीं वृत्तिमाचरेत्। नृपायां विधिना विप्राज्जातो नृप इति स्मृतः। नृपायां नृपसंसर्गात् प्रमादाद् गूढ़जातकः। सोऽपि क्षत्रिय एव स्यादभिषेकं च वर्जितः। अभिषेकं विना प्राप्तो गोज इत्यभिधानकम्। सर्वन्तु राजवत्तस्य शस्यते पदवन्दनम्। पुनर्भूकरणे राज्ञां नृपकालीन एव च। वैश्यायां विधिना विप्राज्जातो ह्यम्बष्ट उच्यते। कृष्याजीवो भवेत्तस्य तथैवाग्नेयवृत्तिकः। ध्वजिनी जीविका वापि अम्बष्ठाः शस्त्रजीविनः। वैश्यायां विप्रतश्चौर्य्यात् कुम्भकारः स उच्यते। कुलालवृत्त्या जीवेत्तु नापिता वा भवन्त्यतः। सूतके प्रेतके वापि दीक्षाकालेऽथ वापनम्। नाभेरूर्द्ध्वन्तु वपनं तस्मान्नापित उच्यते। कायस्थ इति जीवेत्तु विचरेच्च इतस्ततः। काकाल्लौल्यं यमात् क्रौर्य्यं स्थपतेरथ कृन्तनम्। आद्याक्षराणि संगृह्य कायस्थ इति कीर्त्तितः। शूद्रायां विधिना विप्राज्जातः पारशवो मतः। भद्रकादीन् समाश्रित्य जीवेयुः पूजकाः स्मृताः। शिवाद्यागमविद्याद्यैस्तथा मण्डलवृत्तिभिः। तस्यां वै चौरिकावृत्त्या निषादो जात उच्यते। वने दुष्टमृगान् हत्वा जीवनं मांसविक्रयम्। नृपाज्जातोऽथ वैश्यायां गृह्यायां विधिना सुतः। वैश्यवृत्त्या तु जीवेत्तु क्षात्रधर्मं न चाचरेत्। तस्यां तस्यैव चौरेण मणिकारः प्रजायते। मणीनां रचनां कुर्य्यान्मुक्तानां वेधनक्रियाम्। प्रवालानाञ्च सूत्रित्वं शङ्खानां वलयक्रियाम्। शूद्रायां विप्रसंसर्गाज्जात उग्र इति स्मृतः। नृपस्य दण्डधारः स्याद्दण्डं दण्ड्येषु सञ्चरेत्। तस्यैव चौरवृत्त्या जातः शुण्डिक उच्यते। जातिदुष्टान् समारोप्य शुण्डाकर्म्मणि योजयेत्। शूद्रायां वैश्यसंसर्गाद्विधिना सूचकः स्मृतः। सूचकाद्विप्रकन्यायां जातस्तक्षक उच्यते। शिल्पकर्म्माणि चान्यानि प्रासादलक्षणं तथा। नृपायामेव तस्यैव जातो यो मत्स्यबन्धकः। शूद्रायां वैश्यतश्चौर्य्यात् कटकार इति स्मृतः। वशिष्ठशापात्त्रेतायां केचित् पारशवास्तथा। वैखानसेन केचित्तु केचिद्भागवतेन च। वेदशास्त्रावलम्बास्ते भविष्यन्ति कलौ युगे। कटकारास्ततः पश्चान्नारायणगणाः स्मृताः। शाखा वैखानसेनोक्ता तन्त्रमार्गविधिक्रियाः। निषेकाद्याः श्मशानान्ताः क्रियाः पूजाङ्गसूचिकाः। पञ्चरात्रेण वा प्राप्तं प्रोक्तं धर्मं समाचरेत्। शूद्रादेव तु शूद्रायां जातः शूद्र इति स्मृतः। द्विजशुश्रूषणपरः पाकयज्ञपरान्वितः। सच्छूद्रं तं विजानीयादसच्छूद्रस्ततोऽन्यथा। चौर्य्यात् काकवचो चेयश्वानां तृणवाहकः। एतत् संक्षेपतः प्रोक्तं जातिवृत्तिविभागशः। जात्यन्तराणि दृश्यन्ते संकल्पादित एव तु।" पराशरोक्तादासादिजातयस्तत्तच्छब्दे दृश्याः अन्या अपि जातयो ब्रह्मवै० ब्र०ख०१०अ० दर्शिता यथा

"बभूवुर्ब्राह्मणो वक्त्रादन्या ब्राह्मणजातयः। ब्रह्मणो बाहुदेशाच्च जाताः क्षत्रियजातयः। ऊरुदेशाच्च वैश्याश्च पादतः शूद्रजातयः। तासां सङ्करजातेन बभूवुर्वर्णसङ्कराः। गोपनापितलोलाश्च तथा मोदकमूलवौ। ताम्बूलिपर्णकारौ च तथा वणिजजातयः। इत्येवमाद्या विप्रेन्द्र! सच्छूद्राः परिकीर्त्तिताः। शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्द्विजन्मनोः। विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः। ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः। मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः। कुम्भकारः कंसकारः षडेते शिल्पिनां वराः। सूत्रधारश्चित्रकरः स्वर्णकारस्तथैव च। पतितास्ते ब्रह्मशापादयाज्या वर्णसङ्कराः। स्वर्णकारः स्वर्णचौर्य्यात् ब्राह्मणानां द्विजोत्तम!। बभूव सद्यः पतितो ब्रह्मशापेन कर्म्मणा। सूत्रधारो द्विजातीनां शापेन पतितो भुवि। शीघ्रञ्च यज्ञकाष्ठञ्च न ददौ तेन हेतुना। व्यतिक्रमेण चित्राणां सद्यश्चित्रकरस्तथा। पतितो ब्रह्मशापेन ब्राह्मणानाञ्च कोपतः। कश्चिद् वणिक्विशेषश्च संसर्गात् स्वर्णकारिणः। स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापतः। कुलटायाञ्च शूद्रायां चित्रकारस्य वीर्य्यतः। बभूवाट्टालिकाकारः पतितो जारदोषतः। अट्टालिकाकारवीर्य्यात् कुम्भकारस्य योषिति। बभूव कोटिकः सद्यः पतितो गृहकारकः। कुम्भकारस्य वीर्य्येण सद्यः कोटिकयोषिति। बभूव तैलकारश्च कुटिलः पतितो भुवि। सद्यः क्षत्रियवीर्य्येण राजपुत्रस्य योषिति। बभूव तीवरश्चैव पतितो जारदोषतः। तीवरस्य तु वीर्य्येण तैलकारस्य योषिति। बभूव पतितो दस्युर्लेटश्च परिकीर्त्तितः। लेटस्तीवरकन्यायां जनयामास षण्नरान्। मल्लं मल्लं माठरञ्च भड़ं कोलञ्च कन्दरम्। ब्राह्मण्यां शूद्रवीर्य्येण पतितो